## २०. श्री राघवेंद्र स्तोत्रम्

श्री पूर्णबोधगुरुतीर्थपयोब्धिपारा
कामारिमाक्षविषमाक्षशिरःस्पृशंती ।
पूर्वोत्तरामिततरंगचरत्सुहंसा
देवालिसेवितपरांघ्रिपयोजलग्ना ॥१॥

जीवेशभेदगुणपूर्तिजगत्सुसत्व -
नीचोच्चभावमुखनक्रगणैः समेता ।
दुर्वाद्यजापतिगिलैर्गुरुराघवेंद्र -
वाग्देवतासरिदमुं विमलीकरोतु ॥२॥

श्रीराघवेंद्रः सकलप्रदाता स्वपादकंजद्वयभक्तिमद्भ्यः ।
अघाद्रिसंभेदनदृष्टिवज्रःक्षमासुरेंद्रोवतु मां सदायं ॥३॥

श्रीराघवेंद्रो हरिपादकंजनिषेणाल्लब्ध समस्तसंपत् ।
देवस्वभावो दिविजद्रुमोऽयमिष्टप्रदो मे सततं स भूयात् ॥४॥

भव्यस्वरूपो भवदुःखतूलसंघाग्निचर्यः सुखधैर्यशाली ।
समस्तदुष्टग्रहनिग्रहेशो दुरत्ययोपप्लवसिंधुसेतुः ॥ ५ ॥

निरस्तदोषो निरवद्यवेषः प्रत्यर्थिमूकत्वनिधानभाषः ।
विद्वत्परीज्ञेयमहाविशेषो वाग्वैखरीनिर्जितभव्यशेषः ॥ ६ ॥

संतानसंपत्परिशुद्ध भक्तिविज्ञानवाग्देहसुपाटवादीन् ।
दत्वा शरीरोत्थसमस्तदोषान् हत्वा स नोऽव्याद्गुरुराघवेंद्रः ॥ ७ ॥

यत्पादोदकसंचयः सुरनदीमुख्यापगासादिता-
संख्यानुत्तमपुण्यसंघविलसत्प्रख्यातपुण्यावहः ।
दुस्तापत्रयनाशनो भुवि महावंध्यासुपुत्रप्रदो ।
व्यंगस्वंगसमृद्धिदो ग्रहमहापापापहस्तं श्रये ॥ ८ ॥

यत्पादकंजरजसा परिभूषितांगा
यत्पादपद्म मधुपायितमानसा ये ।
यत्पादपद्म परिकीर्तनजीर्णवाच
स्तद्दर्शनं दुरितकाननदावभूतम् ॥ ९ ॥

सर्वतंत्र स्वतंत्रोऽसौ श्रीमध्वमतवर्धनः ।
विजयींद्रकराब्जोत्थसुधींद्रवरपुत्रकः ॥ १० ॥

श्रीराघवेंद्रो यतिराट् गुरुर्मे स्याद्भयापहः ।
ज्ञानभक्तिसुपुत्रायुर्यशःश्रीपुण्यवर्धनः ॥ ११ ॥

प्रतिवादिजयस्वांतभेदचिह्नाधरो गुरुः ।
सर्वविद्याप्रवीणोऽन्यो राघवेंद्रान्न विद्यते ॥ १२ ॥

अपरोक्षीकृतश्रीशः समुपेक्षितभावजः ।
अपेक्षितप्रदाताऽन्यो राघवेंद्रान्न विद्यते ॥ १३ ॥

दयादाक्षिण्यवैराग्यवाक्पाटवमुखांकितः ।
शापानुग्रहशक्तोऽन्यो राघवेंद्रान्न विद्यते ॥ १४ ॥

अज्ञानविस्मृतिभ्रांतिसंशयापस्मृतिक्षयाः ।
तंद्राकंपवचःकौंठ्यमुखा ये चेंद्रियोद्भवाः ॥ १५ ॥

दोषास्ते नाशमायांति राघवेंद्र प्रसादतः ।
"(ओं) श्री राघवेंद्राय नमः" इत्याष्टाक्षरमंत्रतः ॥ १६ ॥

जपिताद्भावितान्नित्यमिष्टार्थ स्युर्न संशयः ।
हंतु नः कायजान् दोषानात्मातीयसमुद्भवान् ॥ १७ ॥

सर्वानपि पुमर्थांश्च ददातु गुरुरात्मवित् ।
इति कालत्रये नित्यं प्रार्थनां यः करोति सः ॥ १८ ॥

इहामुत्राप्तसर्वेष्टो मोदते नात्र संशयः ।
अगम्यमहिमा लोके राघवेंद्रो महायशाः॥ १९ ॥

श्रीमध्वमतदुग्धाब्धिचंद्रोऽवतु सदाऽनघः ।
सर्वयात्राफलावाप्त्यै यथाशक्ति प्रदक्षिणम् ॥ २० ॥

करोमि तव सिद्धस्य वृंदावनगत जलम् ।
शिरसा धारयाम्यद्य सर्वतीर्थफलाप्तये ॥ २१ ॥

सर्वाभीष्टार्थसिद्ध्यर्थं नमस्कारं करोम्यहम् ।
तव संकीर्तनं वेदशास्त्रार्थज्ञानसिद्धये ॥ २२ ॥

संसारेऽक्षयसागरे प्रकृतितोऽगाधे सदा दुस्तरे ।
सर्वावद्यजलग्रहैरनुपमैः कामादिभंगाकुले ॥ २३ ॥

नानाविभ्रमदुर्भ्रमेऽमितभयस्तोमादिफेनोत्कटे ।
दुःखोत्कृष्टविषे समुद्धर गुरो मा मग्नरूपं सदा ॥ २४ ॥

राघवेंद्रगुरुस्तोत्रं यः पठेद्भक्तिपूर्वकम् ।
तस्य कुष्ठादिरोगाणांनिवृत्तिस्त्वरया भवेत् ॥ २५ ॥

अंधोऽपि दिव्यदृष्टिः स्यादेडमूकोऽपि वाक्पतिः ।
पूर्णायुः पूर्णसंपत्तिः स्तोत्रस्यास्य जपाद्भवेत् ॥ २६ ॥

यः पिबेज्जलमेतेन स्तोत्रेणैवाभिमंत्रितम् ।
तस्य कुक्षिगतादोषाः सर्वे नश्यंति तत्क्षणात् ॥ २७ ॥

यद्वृंदावनमासाद्य पंगुः खंजोऽपि वा जनः ।
स्तोत्रेणानेन यः कुर्यात् प्रदक्षिणनमस्कृती ॥ २८ ॥

स जंघालो भवेदेव गुरुराजप्रसादतः ।
सोमसूर्योपरागे च पुष्यार्कादिसमागमे ॥ २९ ॥

योऽनुत्तममिदं स्तोत्रमष्टोत्तरशतं जपेत् ।
भूतप्रेतपिशाचादिपीडा तस्य न जायते ॥ ३० ॥

एतत् स्तोत्रं समुच्चार्य गुरोर्वृंदावनांतिके ।
दीपसंयोजनात् ज्ञानं पुत्रलाभो भवेद्ध्रुवं ॥ ३१ ॥

परवादिजयो दिव्यज्ञानभक्त्यादिवर्धनम् ।
सर्वाभीष्टप्रवृद्धिः स्यात् नात्र कार्य विचारणा ॥ ३२ ॥

राजचोरमहाव्याघ्रसर्पनक्रादिपीडनम् ।
न जायतेऽस्य स्तोत्रस्य प्रभावान्नात्र संशयः ॥ ३३ ॥

यो भक्त्या गुरुराघवेंद्रचरणद्वंद्वं स्मरन् यः पठेत् ।
स्तोत्रं दिव्यमिदं सदा न हि भवेत्तस्यासुखं किंचन ॥ ३४ ॥

किंत्विष्टार्थसमृद्धिरेव कमलानाथप्रसादोदयात् ।
कीर्तिर्दिग्विदिता विभूतिरतुला "साक्षी हयास्योऽत्रहि" ॥ ३५ ॥

इति श्रीराघवेंद्रार्यगुरुराजप्रसादतः ।
कृतं स्तोत्रमिदं पुण्यं श्रीमद्भिर्ह्यप्पणाभिधैः ॥ ३६ ॥

पूज्याय राघवेंद्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥ ३७ ॥

॥ इति श्रीमदप्पणाचार्यविरचितं श्रीराघवेंद्रस्तोत्रम् ॥